संस्कृत

क्र. नं. १७२

स्तोत्र

# धर्मराजस्तुतिः

६१८ | स्तो: २०५

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

स्वस्तिश्रीगणपतयेनमः ॥ ॥धर्मराजउवाच ॥ ॥नमोनमःकारणकारणायतेनमोनमःकारणवर्जिताय ॥न
मोनमःकार्यमयायतुभ्यंनमोनमःकार्यविचित्ररूपं ॥१॥ अरूपरूपायसमस्तरूपिणेपराणुरूपायपरात्पराय
॥अपारपारायउदधिपारपारायतुभ्यंशिवमोक्षयेनमः ॥२॥ कार्येश्वरस्त्वंजगदीश्वरस्त्वंगुणात्मकस्त्वंगुणवर्जित
स्त्वं ॥ कालात्परस्त्वंप्रकृतेपरस्त्वंकालायकालान्तकृतेनमस्ते ॥३॥ त्वमेवनिर्वाणपदंप्रदोसित्वमेवनिर्वाणम
नन्तशान्तेः ॥ त्वमात्मरूपःपरमात्मरूपःत्वमंतरात्मासिचराचरस्य ॥ त्वत्तोजगत्त्वंजगदेवसाक्षाज्जगत्त्वदीयं राम:
जगदेकबंधो ॥४॥ हर्त्ताविहर्त्तात्वंप्रथमोविधाताविधातृवंद्यायनमोनमस्ते ॥ मृत्युस्त्वमेवक्षान्तिर्वरमंगेषुत्वमेवत १

(2)

भीमःश्कृतिवर्त्मगेषु·॥५॥त्वंशंकरःसोमसुभक्तिभाजांसुगोसिरुद्रत्वमभक्तिभाजां·॥त्वमेवशूलीहृदिसंततांत्वमेव
विनम्रचेतोवपुषांशिवोसि·॥६॥श्रीकंठएकःस्वपदांत्रिनेत्रांदुरात्मनांहालहलास्यकंठः॥नमोस्तुतेत्र्यंबकशा
न्तशंभोनमोस्तुतेचंद्रकलावतंस·॥७॥नमोस्तुतुभ्यंफणिभूषणायपिनाकपाणेन्धकवैरिणेनमः॥सएवधन्यस्तव
भक्तिभाग्यस्तवार्चकोयःसुकृतीसएव·॥८॥त्वत्स्तुतीयःकुरुतेमहेशसमस्तयत्तेदुश्च्यवनादिदेवैः॥कस्त्वामिह
स्तोतुमनन्तशक्तेशक्नोतिमाहग्लघुबुद्धिवैभवः॥९॥यावानवाचामिहगोचरोयःस्तुतिर्नतस्यानतिरेवयावत्॥ नमः
॥ ॥इतिश्रीकाशीखण्डेधर्मराजस्तुतिःसमाप्तिमगमत्·॥ ॥स्वस्तिश्रीमन्महागणपतयेनमः·॥ ॥ २

ह२

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com